श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मोहनक्षेत्रनाथ सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री मोहनक्षेत्रनाथ सुप्रभातम् ॥

भास्वानुदेति घनसन्तमसप्ररोहाः
नष्टा भवन्ति विकचानि सरोरुहाणि।
घोषैर्दिशो मुखरयन्त्यखिला विहङ्गाः
पद्मेश मोहनपते तव सुप्रभातम् ॥ 1 ॥

अम्भोरुहप्रभवशङ्करवासवाद्या -
स्त्रैविक्रमादिचरितं विबुधाः समस्ताः।
त्वत्पादसेवनसमुत्सुकिताः स्तुवन्त -
स्तिष्ठन्ति मोहनपते तव सुप्रभातम् ॥ 2 ॥

आदाय सप्त मुनयः समुपास्य सन्ध्या -
मत्र्यादयः सरसिजानि मनोहराणि।
पादारविन्दयुगमर्चयितुं प्रपन्ना -
स्तिष्ठन्ति मोहनपते तव सुप्रभातम् ॥ 3 ॥

ईषत्प्रफुल्लकमलोदरनिर्गतानां
झङ्कारगीतलसतां सुमनोहराणाम्।
वर्गाश्च दिव्यमकरन्दवतामलीनां
निर्यान्ति मोहनपते तव सुप्रभातम् ॥ 4 ॥

उत्फुल्लपङ्कजसुचम्पकनालिकेर -
माकन्दपूगसुमनोहरमल्लिकानाम्।
मन्दानिलः सुखकरः सह दिव्यगन्धै -
रावाति मोहनपते तव सुप्रभातम् ॥ 5 ॥

गोपालमुक्तमहिषाः पशुजातयश्च
    गावश्चरन्ति परितः खलु पक्षिणश्च।
गायन्ति कर्णमधुरं भ्रमराः शुकाश्च
    पद्मेश मोहनपते तव सुप्रभातम्॥ **6**॥

वैकुण्ठवासिविबुधाश्च महीसुराश्च
    स्वर्गस्थदेवनिवहाश्च महर्षयस्ते।
सम्मर्दिताः खलु भृशं तव सेवनार्थं
    तिष्ठन्ति मोहनपते तव सुप्रभातम्॥ **7**॥

गन्धर्वयक्षगरुडामरकिन्नराद्याः
    श्रीनारदादिमुनयः सविशेषवाद्याः।
गायन्ति कर्णमधुरं तव सेवनार्थं
    पद्मेश मोहनपते तव सुप्रभातम्॥ **8**॥

त्वद्दासदासशरणागतदासदास -
    तद्दासदासचरमावधिदासदासाः।
त्वत्पादपङ्कजयुगं शरणङ्गताश्च
    तिष्ठन्ति मोहनपते तव सुप्रभातम्॥ **9**॥

मोहनक्षेत्रनाथस्य सुप्रभातं तु यः पठेत्।
प्रातर्दिने स वै विद्वान् प्राप्नुयात् परमं शुभम्॥ **10**॥

मङ्गलं कालमेघाय कल्याणगुणसिन्धवे।
मोहनक्षेत्रनाथाय नित्यश्रीर्नित्यमङ्गलम्॥ **11**॥

॥ इति श्री मोहनक्षेत्रनाथ सुप्रभातं समाप्तम्॥